३२५१ । निपानमाहावः । ३ । ३ । ७४ ।

आङ्पूर्वस्य ह्वयतेः संप्रसारणमब्वृद्धिश्चोदकाधारश्चेद्वाच्यः । 'आहावस्तु निपानं स्यादुपकूप-जलाशये' ।

3251. The word 'âhâva' is irregularly formed when meaning 'a trough.

The word आहावः is irregularly formed from ह्वे by the prefix आ, then samprasâraṇa, and the vṛiddhi of the vowel. Thus आ+ह्वे+अप्=आहु+अ =आहौ+अ=आहावः 'a trough near a well for watering cattle'. Otherwise आह्वायः 'calling'. Even in the word आहावः the sense of calling is understood. It is that place near a well, containing water, where cattle are called or invited to drink water.

Thus आहावस्तु निपानं स्यादुपकूपजलाशये (Amarakosá I. 10. 26).

३२५२ । भावेऽनुपसर्गस्य । ३ । ३ । ७५ ।

अनुपसर्गस्य ह्वयतेः संप्रसारणमप्च स्याद्भावे । हवः ।

3252. The affix 'ap' comes after the verb 'hve' and there is the change of the semi-vowel to its coroesponding vowel, when the root is upasarga-less, and mere action is denoted.

As हवः 'calling'; हवे हवे सुहवं शूरमिन्द्रम् ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Why do we say 'when no upasarga is in composition with it? Observe आहायः। Though the anuvṛitti of the word भाव was understood in this aphorism from sûtra 3184, its repetition here shows that the anuvṛitti of sûtra 3188, which was running, must not be taken; so that this word applies to agent-kâraka also.

३२५३ । हनश्च वधः । ३ । ३ । ७६ ।

अनुपसर्गाद्धन्तेर्भावे अप्स्यात् । वधादेशश्चान्तोदात्तः । 'वधेन दस्युम्' । चाद्घञ् । घातः ।

3253. The affix 'ap' comes after the root 'han' when upasarga-less, in the sense of mere action, and 'vadha' is the substitute of 'han' before this affix.

This वध has udâtta accent on its final. The affix अप् which is anudâtta generally (III. 1. 4) thus becomes udâtta.

As वधश्चोराणाम् 'the killing of thieves; वधोदस्यूनाम 'the killing of robbers'.

When action is not denoted, the affix घञ् applies; as घातः 'a blow.

So also when an upasarga is in composition with it; as प्रघातः, घातः।

The word च in the aphorism does not connect हन्, with the substitute वध, there being no co-ordination, it refers to the affixes under discussion. Thus we have the affix घञ् also; as घातः 'killing'.

३२५४ । मूर्तौ घन । ३ । ३ । ७७ ।

मूर्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरप्स्यात् । घनश्चादेशः । अभ्रघनः । कथम् 'सैन्धवघनमानय' इति । घर्मशब्देन घर्मी लक्ष्यते ।

3254. The affix 'ap' comes after the verb 'han', when the word so formed means solidity, and 'ghan' is the substitute of han.

The word मूर्त्ति means 'hardness', 'solidity'. Thus अभ्रघनः 'a mass of cloud'; दधिघनः 'solid curd'. How do we say घनं दधि or सैन्धवघनमानय. Here the quality is taken for the thing qualified.

३२५५ । अन्तर्घनो देशे । ३ । ३ । ७८ ।

वाहीकग्रामविशेषस्य संज्ञेयम् । 'अन्तर्घणः' इति पाठान्तरम् ।

3255. The verb 'han' preceded by the word 'antar' takes the affix 'ap' and 'ghan' is the substitute of the word 'han', when the word so formed means 'a country'.

As अन्तर्+हन्+अप्=अन्तर्+घन्+अ=अन्तर्घनः 'name of a country of Bâhika'; (a porch or court, an open space before the house between the entrance door and the house). Some write the word with a ण as अन्तर्घणः, that is also valid.

Why do we say 'when meaning a country'? Observe अन्तर्घातो 'striking in the middle'.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

३२५६ । अगारैकदेशे प्रघणः प्रघाणश्च । ३ । ३ । ७९ ।

द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च । तत्र बाह्ये प्रकोष्ठे निपातनमिदम् । प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः-प्रघाणः । कर्मण्यप् । पक्षे वृद्धिः ।

3256. The words 'praghaṇa' and 'praghâṇa' are irregularly formed, meaning 'a portion of a dwelling house'.

Thus प्रघणः or प्रघाणः 'a porch before the door of a house, a portico'. The ap has the force of object'. There is vṛiddhi in one alternative. On both sides of an entrance to a house there are open spaces. The outer-yard is called praghâṇa or praghaṇa. Because persons entering *strike* that ground with their feet to throw off dust and dirt—so it is well stricken ground indeed.

This is formed from हन् with प्र, irregularly.

Why do we say when meaning a portion of a house? Observe प्रघातः ।

३२५७ । उद्घनोऽत्याधानम् । ३ । ३ । ८० ।

अत्याधानमुपरिस्थापनम् । यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्षन्ते तदुद्घनः । अधिकरणेऽप् ।

3257. The word 'udghana' is irregularly formed in the sense of 'bench'.

This is formed from उत्+हन् irregularly. Thus उद्घनः 'a carpenter's bench' (the wood on which placing other planks &c. the carpenter planes, carves &c.) The ap has the force of location.

When not having this sense, we have उद्घातः 'uneven'.

३२५८ । अपघनोऽङ्गम् । ३ । ३ । ८१ ।

अङ्गं शरीरावयवः । स चेह न सर्वः किं तु पाणिः पादश्चेत्याहुः । करणेऽप् । अपघातोऽन्यः ।

3258. The word 'apaghana' is irreguarly formed meaning 'a member of the body'.

This is formed irregularly from अप+हन्. Thus अपघनः 'a limb or member of the body'. The word अङ्गम् means a portion of the body, such as hand or foot, and not the whole body. The ap has the force of Instrument here. Otherwise we have अपघातः ।

३२५९ । करणेऽयोविद्रुषु । ३ । ३ । ८२ ।

एषु हन्तेः करणेऽप्स्याद्घनादेशश्च । अयो हन्यतेऽनेनेत्ययोघनः । विघनः । द्रुघनः । 'द्रुघणः' इत्येके । 'पूर्वपदात्संज्ञायाम्–' (८५७) इति णत्वम् । संज्ञैषा कुठारस्य । द्रुर्वृघः ।

3259. The affix 'ap' comes after the verb 'han' when the words, 'ayas', 'vi' or 'dru' are in composition with it, when the word so formed is related to the verb as an instrument, and 'ghan' is the substitute of 'han'.

As अयोघनः 'a forge-hammer' (whereby the iron is destroyed); विघनः 'a mallet'; द्रुघनः 'an axe' lit. the tree (dru)-cutter. Some write द्रुघणः, the न being changed into ण either by rule VIII. 4. 3. S. 857 or by

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

including this word in the class of आरोहणादि (IV. 2. 80). 'Dru' means 'tree'.

३२६० । स्तम्बे क च । ३ । ३ । ८३ ।

स्तम्ब उपपदे हन्तेः करणे कः स्यादप् च । पक्षे घनादेशश्च । स्तम्बघ्नः-स्तम्बघनः । करण इत्येव । स्तम्बघातः ।

3260. The affix 'ka' also comes after the verb 'han', when 'stamba' (a clump) is the word in composition, and the relation of the word so formed to the verb is that of an instrument.

The word च in the sûtra draws in अप् from the last aphorism and in that case घन् replaces हन्. Thus स्तम्बघ्न or स्तम्बघनः 'a small hoe for weeding clumps of grass'. In the feminine gender, the forms are स्तम्बघ्ना as well as स्तम्बघना । When क is added we have स्तम्बघ्नः । Thus हन्+क=ह्न्+अ (VI. 4. 98) =घ्न (VII. 3. 54). When अप् is added, हन् is totally replaced by घन् । When instrument is not meant, we have स्तम्बघातः ।

३२६१ । परौ घः । ३ । ३ । ८४ ।

परौ हन्तेरप् स्यात्करणे घशब्दश्चादेशः । परिहन्यतेऽनेनेति परिघः ।

3261. The affix 'ap' comes after the verb 'han' when the upasarga 'pari' is in composition, and the relation between the word so formed, and the verb, is that of an instrument, and 'gha' replaces 'han'.

Thus परिघः 'an iron beam used for locking or shutting the gate, an iron club'. By the next sûtra, we get another form of this word.

३२६२ । परेश्च घाङ्कयोः । ८ । २ । २२ ।

परे रेफस्य लो वा स्याद्घशब्देऽङ्कशब्दे च । पलिघः-परिघः । पर्यङ्कः-पल्यङ्कः । इह 'तरप्तमपौ घः' (२००३) इति कृत्रिमस्य न ग्रहणं व्याख्यानात् ।

2262. The र् of परि is changed to ल् before gha and anka.

As परिघः or पलिघः, पर्यङ्कः or पल्यङ्कः ॥ The worb घ here means the word-form घ, and not the technical घ of तरप् and तमप् ॥ See I. 1. 22. S. 2003.

३२६३ । उपघ्न आश्रये । ३ । ३ । ८५ ।

उपपूर्वाद्धन्तेरप् स्यादुपधालोपश्च । आ श्रयशब्देन सामीप्यं लक्ष्यते । पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः ।

3263. The word 'upaghna' is irregularly formed meaning 'an inclined place for leaning or support'.

It is formed by adding अप् (III. 3. 76) to the verb हन् preceded by the upasarga उप, then eliding the penultimate अ of ह; this is the irregularity. Then by sandhi rules हन् is changed into घ्नः । This form would have been given by the affix क also, without any irregularity.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

The word आश्रय refers to proximity, contiguity. Thus पर्वतोपघ्नः 'the declivity of the mountain'; so also ग्रामोपघ्नः 'bordering the village'.

Why do we say 'when meaning 'support'? Observe पर्वतोपघातः।

३२६४। संघोद्घौ गणप्रशंसयोः। ३। ३। ८६।

संहननं संघः। भावेऽप्। उद्धन्यते उत्कृष्टो ज्ञायत इत्युद्घः। कर्त्तर्यप्। गत्यर्थानां बुद्ध्यर्थत्वाद्धन्तिर्ज्ञाने।

3264. The words 'saṅgha' and udgha' are irregularly formed in the sense of 'a collection', and 'a praise' respectively.

These words are thus formed, सम्+हन्+अप्=सं+घ्+अ=सं+घ्+अ=संघः Thus संघः पशूनाम् 'a herd of cattle'; so also उद्घो मनुष्यः 'an excellent man' 'who knows' well. The word 'respectively' is inserted from I. 3. 10. When not used in these senses, we have संघातः 'union'. In saṅgha, the ap has the force of 'condition', and in udgha of 'object', as all roots meaning 'to go', denote also 'to understand', so 'han' here means 'to know', in udgha.

३२६५। निघो निमितम्। ३। ३। ८७।

समन्तान्मितं निमितम्। निर्विशेषं हन्यन्ते ज्ञायन्ते इति निघाः वृक्षाः। समारोहपरिणाहा इत्यर्थः।

3265. The word 'nigha' is irregularly formed in the sense of 'as high as broad.'

The word निमित means 'measured all round' i. e. 'as high as broad' literally that which is known (hanyante=jñâyante) fully. As निघा वृक्षाः 'trees as high as broad'. निघा शालयः square or cubic or circular halls. Otherwise, when not meaning 'as high as broad', we have निघातः 'a blow'. The word निमितं=समन्तान्मितं, समारोहपरिणाहम्। It may be derived from मा or from मि। In the first case it will mean 'measured' and in the other, 'erected, built'. Professor Bothlingk refers to *Apastamba Dharma.* I. 20. 30 for the meaning of this word.

३२६६। ड्वितः क्त्रिः। ३। ३। ८८।

अयं भाव एव स्वभावात्। 'क्त्रेर्मम्नित्यम्'। नित्यग्रहणात्क्त्र्यन्तस्याविषयः। अत एव क्त्र्यन्तेन न विग्रहः। डुपचष्। पाकेन निवृत्तं पक्त्रिमम्। डुवप्। उप्त्रिमम्।

3266. The affix 'ktṛi' comes after the verb which has an indicatory 'ḍu', when denoting mere action &c.

The phrases 'when the sense is that of mere action', and 'when the sense is that of an appellative, the word being related to the verb from which its name is deduced, but not as agent', are of course understood in this, as in all the previous aphorisms. Then by IV. 4. 20, S. 1570 (of the affix क्त्रि, मप् is always the augment) we must add म, for we can not use the affix त्रि alone; but we must always use त्रिमप्॥ Thus डुपचष् 'to cook'—

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

पक्त्रिमम् 'what is ripe'; डुवप्—उप्त्रिमम् 'sown' (VI. 1. 15); डुकृञ्—कृत्रिमम् 'artificial'.

३२६७ । ट्वितोऽथुच् । ३ । ३ । ८९ ।

अयमपि स्वभावाद्भाव एव । टुवेपृ । वेपथुः । श्वयथुः ।

3267. After that verb which has an indicatory 'ṭu', the affix athuch, comes with the force of denoting mere action &c.

As टुवेपृ—वेपथुः 'a trembling'; टुओश्वि—श्वयथुः 'swelling'; टुक्षु—क्षवथुः 'sneezing; टुदु—दवथुः 'burning'.

३२६८ । यजयाचयतविच्छप्रच्छरक्षो नङ् । ३ । ३ । ९० ।

यज्ञः । याच्ञा । यत्नः । विश्नः । प्रश्नः । 'प्रश्ने चासन्न–' (२१११) इति ज्ञापकान्न संप्रसारणम् । ङित्वं तु विश्न इत्यत्र गुणनिषेधाय । रक्ष्णः ।

3268. After the verbs 'yaj' (to worship), 'yâch' (to ask for,) 'yat (to strive), 'vichchh' (to shine), 'prachchh' (to ask) and 'raksh' (to preserve), comes the affix 'naṅ' with the force of denoting mere action &c.

The conditions of S. 3184 and 3188 are understood here also. The ङ् of नङ् is for the sake of prohibiting guṇa or vṛiddhi (I. 1. 5 S. 2217); as यज्ञः 'sacrifice'; याच्ञा 'solicitation'; यत्नः 'effort'; विश्नः (VI. 4. 19 S. 2561) 'lustre'; no guṇa, because of ङ्। प्रश्नः 'a question'; रक्ष्णः protection.

The root प्रच्छ, by VI. 1. 16, S. 2412 ought to have changed its र into ऋ the ङित् affix नङ्. Its not doing so must be taken to be an irregularity before countenanced by Pâṇini, as we know from the fact that Pâṇini himself uses the form प्रश्नः in III. 2. 117. S. 2777.

३२६९ । स्वपो नन् । ३ । ३ । ९१ ।

स्वप्नः ।

3269. The affix 'nan' comes, under similar circumstances, after the verb 'svap' (to sleep).

The final न् is indicatory and regulates the accent (VI. 1. 197 S. 3686;) as स्वप्नः 'a dream'.

३२७० । उपसर्गे घोः किः । ३ । ३ । ९२ ।

प्रधिः । अन्तर्धिः । उपाधीयतेऽनेनेत्युपाधिः ।

3270. The affix 'ki' comes under similar conditions, after a 'ghu' verb (I. 1. 20 S. 2373), when an upasarga is in composition with it.

The क् is indicatory, by force of which the final आ is elided (VI. 4. 64 S. 2372). Thus प्र+दा+कि=प्रदिः 'a present'; प्रधिः 'the periphery of a wheel'; उपाधिः 'fraud'; अन्तर्द्धिः 'vanishing'.

३२७१ । कर्मण्यधिकरणे च । ३ । ३ । ९३ ।

कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे । जलानि धीयन्तेऽस्मिन्निति जलधिः ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

3271. The affix 'ki' comes after a 'ghu' verb, when a word in the accusative case is in composition with it, and when the relation of the word so formed to its verb, is that of 'location'.

As जलधिः 'the ocean (in which water is held)'; शरधिः 'a quiver (that in which arrows are put)'.

The word 'location' in the aphorism indicates that the words so formed should have no other significance. The word च in the aphorism draws in the affix कि from the last sûtra.

३२७२ । स्त्रियां क्तिन् । ३ । ३ । ९४ ।

स्त्रीलिङ्गे भावादौ क्तिन्स्याद्घञोऽपवादः । अजपौ तु परत्वाद्बाधेते । कृतिः । चितिः । स्तुतिः स्फायी–स्फाति 'स्फीतिकामः' इति तु प्रामादिकम् । क्तान्ताद्भाववर्थे णिचि 'अच इः' इति वा समाधेयम् । '* श्रुयजीषिस्तुभ्यः करणे *' श्रूयतेऽनया श्रुतिः । यजेरिषेश्च इष्टिः । स्तुतिः । '* ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः *' । तेन नत्वम् । कीर्णिः । गीर्णिः । लूनिः । धूनिः । यूनिः । 'ह्रादः–' (३०७३) इति योगविभागात्क्तिनि ह्रस्वः । प्रह्रन्निः । 'ति च' (३०३७) । चूर्तिः । फुल्विः । '* चायतेः क्तिनि चिभावो वाच्यः *' । अपचितिः । '* संपदादिभ्यः क्विप् *' । संपत् । विपत् । "क्तिन्नपीष्यते' । संपत्तिः । विपत्तिः ।

3272. To express an action &c. by a word in the feminine gender, the affix 'ktin' is added to the root.

The conditions of rules 3184 and 3188 are understood here also. This supersedes घञ्, अच् and अप् affixes, being taught subsequent to them. Thus कृतिः 'action', चितिः 'a gathering'; मतिः 'understanding': स्तुतिः 'praise'; स्फातिः 'swelling'. The form स्फीति is erroneous, for स्फा is changed to स्फी only in the Nishṭhâ (S. 3041). Or it is derived from the root स्फीति formed from the Past Part. स्फीत with णिच् and adding इ । Thus स्फीति + इ (अचः इः) = स्फीतिः (VI. 1. 22. S. 3044). The णिच् is added to p. p. स्फीत to make it a root by the gana—sûtra given under the Churâdi √कत्र (No. 368).

Note.—The affix *ktin* should be declared to come after the verbs आप् 'to get' &c. Thus आप्तिः 'getting'; राद्धिः 'accomplishment'; दीप्तिः 'shining'; स्रस्तिः 'a slip'; ध्वस्तिः 'destruction'; लब्धिः 'gain'.

Vart.—So also after the verbs श्रु 'to hear', यज् 'to worship' इष 'to wish' and स्तु 'to praise', when instrument is meant; as श्रुतिः 'ear' (that by which we hear)'; so इष्टिः, 'a sacrifice' or 'a wish' from yaj and ish: स्तुतिः 'a praise.

Note.—The affix नि comes after the verbs 'ग्लै to be exhausted', म्लै 'to fade, 'ज्या to grow old' and हा 'to leave'; as ग्लानिः 'exhaustion'; म्लानिः 'fading', ज्यानिः 'old age'; हानिः 'loss'.

Vart.—The affix क्तिन् coming after verbs ending in long ॠ and the verbs लू &c. is like a Nishṭhâ. Thus कीर्णिः 'scattering'; This form is thus evolved: कॄ + क्तिन् = कि + ति (VII. 1. 100 S. 2390) = किर् + ति (I. 1. 51 S. 70) = कीर् + ति (VIII. 2. 77 S. 354). At this stage, त is changed into न by the

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

affix being treated as a Nishṭhâ (VIII. 2. 42 S.3018), and this न is changed into ण by the ordinary rules of sandhi; so also गीर्णिः 'praise'; जीर्णिः 'old age'; शीर्णि 'drying' लूनिः (VIII. 2. 44) 'cutting'; यूनिः 'joining'; धूनिः 'agitation'; पूनि :'destruction' The आ of hlâd is shortened to अ by the analogy of Nishṭhâ (VI. 4. 95 S 3073) by dividing it into two). As प्रह्लन्निः ॥ Similarly चूर्तिः। फुल्ति। The अ of चर् and फल् is changed to उ by S. 3037.

Vart:—Before क्तिन् affix चाय् is always changed to चि, as अपचितिः 'Loss, destruction, showing reverence'. The affix क्तिन् is added to चाय् by considering it as belonging to the class of आप् &c. See above *Vart.* Otherwise it would take the affix अ by III. 3. 103.

Vart.—The affix क्विप् comes after the verbs संपद् &c, as संपद् 'prosperity'; विपद् 'a calamity'; प्रतिपद् 'access'. The affix क्तिन् is also employed after these verbs:—as संपत्तिः, विपत्तिः। The verbs लू &c. are 21 verbs of kryâdi class.

३२७३ । स्थागापापचो भावे । ३ । ३ । ९५ ।

क्तिन्स्यादङोऽपवादः। प्रस्थितिः। उपस्थितिः। संगीतिः। संपीतिः। पक्तिः। कथम् 'अवस्था' 'संस्था' इति। 'व्यवस्थायाम्' इति ज्ञापकात्।

3273. After the roots 'sthâ' (to stand), 'gâ' (to sing) pâ, (to drink) and 'pach' (to cook), the affix 'ktin' is employed, when a word in the feminine gender denoting a 'mere action' is to be expressed.

This debars the affix अङ् (III. 3. 106 S. 3283) which generally supersedes क्तिन् in cases of compound verbs ending in long आ. Thus प्रस्थितिः 'a journey' (VII. 4. 40 S. 3074.); उद्गीतिः 'a singing aloud'; गै+क्ति=गा+ति (VI. 1. 45 S. 2370) =गी+ति (VI. 4. 66 S. 2462); संगीतिः 'a concert', प्रपीतिः 'a cistern'; संपीतिः 'drinking together'; पक्तिः 'cooking'.

The repetition of the word भाव in this aphorism, in spite of its anuvritti being understood from S. 3184 is to exclude every other significance.

How do we get froms like अवस्था and संस्था? Pâṇini himself, in his sûtras, has used forms like व्यवस्था &c. See I. 1. 34. S. 218 This is enough justification for us to derive forms like अवस्था, संस्था &c. by applying the affix अङ् under S. 3283 in spite of the present sûtra, which requires us to apply क्तिन् only.

३२७४ । ऊतियूतिजूतिसातिहेतिकीर्तयश्च । ३ । ३ । ९७ ।

अवतेः 'ज्वरत्वर–' (२६५४) इत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। 'द्यतिस्यतिमास्था–' (३०७४) इतीत्वे प्राप्त इत्वाभावो निपात्यते। सनोतेर्वा 'जनसन–' (२५०४) इत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः।

3274. And these words *viz.* 'ûti' (preserving, sport), 'yûti' (joining), 'jûti' (velocity), 'sâti', (destruction), 'heti'

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

(a weapon) and 'kîrti' (fame) are anomalous forms, acutely accented.

The anuvṛitti of the word मंत्रे does not exist in this; but the word उदात्त of the last Ashtâdhyâyî sûtra S. 3420 is understood here. The word ऊति is thus formed:—अव 'to protect'+क्तिन्=ऊ+ति: (VI. 4. 20. S. 2654)=ऊतिः। This form is regular and could be evolved from III 3. 94 also; but not so the accent. The irregularity in यूतिः and जूतिः consists in the lengthening of उ into ऊ; in सातिः the आ of the root षै which becomes सा by VI. 1 45 S. 2370 is not changed into इ, as rule VII. 4. 40 S. 3074 required, and this is the irregularity. This form may also be derived from the root सन् with perfect propriety, except as to the accent, which would be regulated by the present sûtra: thus सन्+क्तिन्=सा+क्तिन् (VI. 4. 42 S. 2504)=साति. The form हेतिः may by derived either from हन् or हिनोति।

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः॥ (Rig. I. 7. 4) 'O Indra mayst thou mighty, defend us in battles and in fights of a thousand duels with thy mighty protections'. So also कीर्तिः।

३२७५। व्रजयजोर्भावे क्यप्। ३। ३। ९८।

व्रज्या। इज्या।

3275. The affix 'kyap' comes after the roots 'vraj' (to go) and 'yaj' (to worship) acutely accented, in forming a word in the feminine denoting action.

This supersedes क्तिन्. Thus व्रज्या 'wandering about'; इज्या (VI. 1. 15 S. 2409) 'worshipping'. The प् of क्यप् is indicatory, and though it serves no purpose in this sûtra, it is, however, necessary in the next, for it is by force of क्यप् having प्, that we add a त by VI. 1. 71 S. 2858, in the words formed in the next aphorism.

३२७६। संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः। ३। ३। ९९।

समजादिभ्यः स्त्रियां भावादौ क्यप्स्यात्स चोदात्तः संज्ञायाम्। '*अजेः क्यपि वीभावो नेति वाच्यम्*'। समजन्त्यस्यामिति समज्या सभा। निषीदन्त्यस्यामिति निषद्या। आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या गलपार्श्वशिरा। विदन्त्यनया विद्या। सुत्याभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या शिबिका।

3276. The affix 'kyap' comes after the following verbs in forming a word in the feminine denoting 'an appellative' and is acutely accented *viz*:—'sam-aj', 'nishad' 'ni-pat', 'man', 'vid', 'suñ', 'śîñ', 'bhṛiñ' and 'iṇ'.

Thus समज्या 'an assembly' *Vart*:—The अज्, is not changed to वी before the affix kyap inspite of II. 4. 56. S. 2292 निषद्या 'a small bed or couch'; निपत्या 'slippery ground'; मन्या 'the nape or the back of the neck', by which one *understands* when a man is an anger'; विद्या 'knowledge'; सुत्या (VI. 1. 71) 'extraction of soma juice, parturition'; शय्या 'bed'; भृत्या 'wages' service; इत्या 'a litter' palanquin'.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

३२७७ । कृञः श च । ३ । ३ । १०० ।

'कृञः' इति योगविभागः । कृञः क्यप्स्यात् । कृत्या । 'श च' । चात्क्तिन् । क्रिया । कृतिः ।

3277. And after the root 'kṛi' comes the affix 'śa' in forming a feminine, as well as the affix 'kyap'.

By the force of the word च we draw the affix क्यप् into this sûtra, and by the process called योगविभाग we can split up this aphorism into two :—

(1) कृञः 'after the root कृ there is the affix kyap'. As कृत्या ।

(2) श च 'and the affix श as well as ktin. Thus क्रिया, and कृतिः । When the affix श is added, the root assumes the form क्रिय by III 1. 67 S. 2756.

३२७८ । इच्छा । ३ । ३ । १०१ ।

इषेर्भावे शो यगभावश्च निपात्यते । इच्छा । '*परिचर्यापरिसर्यामृगयाटाटयानामुपसंख्यानम्*' । शो यक्च निपात्यते । परिचर्या पूजा । परिसर्या परिसरणम् । अत्र गुणोऽपि । मृग अन्वेषणे चुरादावदन्तः । अतो लोपाभावोऽपि । शे यकि णिलोपः । मृगया । अटतेः शे यकि टयशब्दस्य द्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घश्च । अटाटया । '*जागर्तेरकारो वा*' । पक्षे शः । जागरा–जागर्या ।

3278. The form 'ichchhâ' (desire) is irregular.

The word is thus formed : इष्+श=इच्छ+अ=इच्छा. The यक् ordained by III 1. 67 S. 2756 is not added, this is the irregularity.

Vart.—The follwing words are also irregularly formed:—परिसर्या 'perambulation'; the guṇa is also an anomaly; परिचर्या attendance, service; मृगया 'hunting' from the churâdi root mriga (No. 137) 'to search': it ends in अ । This अ is not elided, the णि is elided before श and यक् । अटाटया 'the habit of roaming about as a religious mendicant'. The affixes श and यक् are irregularly added, and the syllable टय is reduplicated, but no य in the first portion, while the vowel is lengthened.

Vart.—From the root जागृ we have either जागरा or जागर्या 'waking'. The first is formed by the affix अ, the latter by श which brings in यक् (III. 1. 67 S. 2756).

३२७९ । अ प्रत्ययात् । ३ । ३ । १०२ ।

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात् । चिकीर्षा । पुत्रकाम्या ।

3279. After the verbs that end in an affix, there is the affix 'a', the word being feminine.

The verbs that end in an affix are derivative roots, such as Desideratives, Causatives, Intensives and Denominatives. Though taking affixes, they are called धातु (III. 1. 32 S. 2304), after these verbs the affix अ is used in forming the feminine noun.

Thus कृ+सन्=चीकिर्ष 'to wish to do; this is a Derivative root; after this root चिकीर्ष, we add अ। Thus चिकीर्ष+अ (VI. 4. 48 S. 2308)=चिकीर्ष । Then we add टाप् by IV. 1. 4. S. 454 and get चिकीर्षा 'the desire to do'; so also जिहीर्षा 'the desire to take'; पुत्रीया 'the desire to be like a son'; पुत्रकाम्या

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

'desire of a son'; लोलूया 'much cutting'; कण्डूया 'itch'. The sûtra is also found as अः प्रत्ययात्।

३२८० । गुरोश्च हलः । ३ । ३ । १०३ ।

गुरुमतो हलन्तात्स्त्रियामकारः स्यात् । ईहा । ऊहा । 'गुरोः' किम् । भक्तिः । 'हलः' किम् । नीतिः । '* निष्ठायां सेट इति वक्तव्यम् *' । नेह । आप्तिः । 'तितुत्र–' (३१६३) इति नेट् । दीप्तिः । '* तितुत्रेष्वग्रहादीनामिति वाच्यम् *' निगृहीतिः । निपठितिः ।

3280. The affix 'a' comes after that verb which has a prosodially heavy vowel and ends in a consonant, when the word to be formed is feminine.

This debars क्तिन्। Thus कुण्डा 'an adulteress'; हुण्डा 'a tigress'; ईहा 'effort'; ऊहा 'supplying an ellipsis'.

Why do we say 'which has a prosodially heavy vowel'? Observe भक्तिः 'devotion'. Why do we say 'which ends in a consonant'? Observe नीतिः 'polity'.

Vart.—The affix ktin comes after roots which take an indicatory इ in the Niṣṭhâ. Not here as आप्तिः। The ktin does not take इट् by VII. 2. 9. S. 3163. So we get दीप्तिः।

Vart.—The affix ति, तु and त्र take इट् augment after ग्रह् and words of similar formation :— as निगृहीतिः, उपस्निहितिः, निकुचितिः । निपठितिः ॥

३२८१ । षिद्भिदादिभ्योऽङ् । ३ । ३ । १०४ ।

षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ् । जॄष् । 'ऋदृशोऽङि गुणः' (२४०६) । जरा । त्रपूष् । त्रपा । भिदा । विदारणे एवायम् । भित्तिरन्या । छिदा । मृजा । क्रपेः संप्रसारणं च । कृपा ।

3281. The affix 'aṅ' comes after those verbs that have an indicatory 'ṣh', and after 'bhid' &c, when the word to be formed is feminine.

Thus जॄष् has an indicatory ष्, the real root being जॄ। From it we have जरा 'old age' (VII. 4. 16 S. 2406 causes guṇa), ; त्रपुष्—त्रपा 'bashfulness'.

So also from verbs of the *Bhidâdi* class we have भिदा 'breaking'; in the alternative we have भित्तिः। So also छिदा 'cutting'; छित्तिः 'cutting', आरा 'a knife, an iron instrument'; आर्त्तिः 'distress'; धारा a stream'; धृतिः। The list of *Bhidâdi* verbs will not be found given in one place in the *Dhatupâtha*. They have been collected from different *Ganas*, and are the following :—

भिदा, छिदा, विदा, क्षिपा, गुहा (गिर्योषध्योः), श्रद्धा, मेधा, गोधा, आरा, हारा, कारा, क्षिया, भारा, धारा लेखा, रेखा, चूडा, पीडा, वपा, वसा मृजा, सृजा, कृपा । (क्रपेःसंप्रसारणं च) and there is vocalisation of the र of krap. As क्रप्+अङ्+आ=कृपा ।

३२८२ । चिन्तिपूजिकथिकुम्बिचर्चश्च । ३ । ३ । १०५ ।

अङ् स्यात् । युचोऽपवादः । चिन्ता । पूजा । कथा । कुम्बा । चर्चा ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

3282. The affix 'aṅ' as well as the affix 'yuch' comes after the following verbs, forming feminine words:—'chint' (to think), 'pûj' (to worship) 'kath' (to narrate), 'kumb' (to cover) and 'charch' (to learn).

The force of च is to include the affix युच् into this sûtra (see III. 3. 107 S. 3284). All these verbs belong to the *Churâdi* or 10th class, and would have exculsively taken युच् by III. 3. 107 S. 3284.

Thus चिन्ता 'thought'; पूजा 'worship'; कथा 'narration'; कुम्बा 'a covering', 'a thick petticoat'; चर्चा 'recitation'.

When the affix is युच्, the forms are चिन्तना &c. (VII. 1. 1. S. 1247).

३२८३ । आतश्चोपसर्गे । ३ । ३ । १०६ ।

अङ् स्यात् । क्तिनोऽपवादः । प्रदा । उपदा । * श्रदन्तरोरुपसर्गवद्वृत्तिः । श्रद्धा । अन्तर्धा । 'उपसर्गे घोः किः' (३२७०) इत्यनेन किः । अन्तर्धिः ।

3283. The affix 'aṅ' comes after those verbs which end in long â' when an upasarga is in composition, and when the word to be formed is feminine.

This supersedes क्तिन्. Thus प्रदा, प्रधा, उपदा, उपधा &c.

Vart.—For the purposes of this rule the particles श्रत् and अन्तर् should be treated like upasargas. Thus श्रद्धा 'faith' अन्तर्द्धा (I. 4. 59). So also कि is added by S. 3270. As अन्तर्धिः ।

३२८४ । ण्यासश्रन्थो युच् । ३ । ३ । १०७ ।

अकारस्यापवादः । कारणा । हारणा । आसना । श्रन्थना । '* घट्टिवन्दिविदिभ्यश्चेति वाच्यम् *' । घट्टना । वन्दना । वेदना । '* इषेरनिच्छार्थस्य *' । अन्वेषणा । '* परेर्वा *' । पर्येषणा । परीष्टिः ।

3284. After verbs ending in 'ṇi', and after 'âs' (to sit) and 'śranth' (to loose), there is the affix 'yuch' when the word to be formed is feminine.

This excludes the affix अ (III. 1. 102 S. 3279). Thus कृ+णिच्=कारि; कारि+युच्=कारणा (the इ is elided by VI. 4. 51) 'the causing to do'; हारणा 'the causing to take'; आसना 'the sitting'; श्रन्थना 'the loosening'.

The root श्रन्थ taken here belongs to the *Kryâdi* class, meaning 'to loosen' and is not the श्रन्थ of Churâdi class, for the latter would be included, as a matter of course by belonging to the Churâdi class, which class of verbs take the affix णिच् ।

Vart.—The verb घट्ट 'to move', वन्द 'to praise', and विद 'to feel', should also be enumerated, as taking युच्. Thus घट्टना 'shaking', वन्दना 'praising', वेदना 'knowledge, feeling, pain'. The verb घट्ट here belongs to the Tudâdi class, and means 'to move' and not the घट्ट of the Churâdi class, for that is already included by being णिजन्त ।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Vart.—The affix युच् comes after इष् when it does not mean 'to desire'. Thus अध्येषणा 'solicitation'; अन्वेषणा 'the searching after'.

Vart.—So also optionally when इष् takes the upasarga परि; as, पर्येषणा or परीष्टिः 'investigation by reasoning'.

३२८५। रोगाख्यायां ण्वुल्बहुलम्। ३। ३। १०८।

प्रच्छर्दिका। प्रवाहिका। विचर्चिका। क्वचिन्न। शिरोऽर्तिः। '* धात्वर्थनिर्देशे ण्वुल्वक्तव्यः *'। आसिका। शायिका। '* इक्श्तिपौ धातुनिर्देशे *'। पचिः-पचतिः। '*वर्णात्कार*'। निर्देश इत्येव। अकारः। ककारः। '* रादिफः *'। रेफः। '*मत्वर्थाच्छः*'। बहुलवचनादकारलोपः। मत्वर्थीयः। '* इणजादिभ्यः *' आजिः। आतिः। '* इञ्वपादिभ्यः *'। वापिः। वासिः। स्वरे भेदः। '* इकृष्यादिभ्यः *'। कृषिः। *गिरिः*।

3285. The affix 'ṇvul' comes diversely after a verb, when the word to be formed is a feminine noun, being the name of 'a disease.'

This debars क्तिन् and all the rest. By using the word आख्या in the sûtra it is meant that the word so formed by this affix should be the appellation of the disease. The word 'diversely' shows the usual licence in the application all the rules of grammar. Thus प्रच्छर्दिका (VII. 1. 1 S. 1247) 'vomiting;' प्रवाहिका 'diarrhœa'; विचर्चिका 'itch'. scab'. Sometimes this affix does not apply; as शिरोर्त्तिः 'head-ache'.

Vart.—The affix *nvul* is employed also in simply pointing out the meaning of the roots; thus, आशिका 'to enjoy', शायिका to 'lie down' &c.

Vart.—The affixes इक् and श्तिप् are also employed in merely pointing out the roots; as भिदिः, छिदिः, पचतिः, पठतिः &c. The constant use of these affixes is to be found in these very sûtras. In the aphorisms the roots are exhibited in various ways; thus in S 3224 we have the root श्रि and यु exhibited as श्रयतिः and यौतिः। These latter forms indicate nothing more than the simple roots. So also, see VIII. 4. 17 S. 2285; VI. 4. 49. S. 2631

Vart.—The affix कार is employed in merely pointing out letters; as ककारः means 'the letter क'; so also अकारः 'the letter अ'; इकारः 'the letter इ'।

Vart.—The affix इफ is employed in pointing out the letter र; as रेफः

Vart.—The affix छ comes after the word मत्वर्थ in merely pointing it out, and there is elision of the final अ diversely; as मत्वर्थीयः।

Vart.—The affix इण् comes after the verbs अज् &c; as आजिः, आतिः, आदिः।

Vart.—The affix इञ् comes after वप् &c As वापिः। वासिः। The difference is in accent. See S. 3686.

Vart.—The affix इक् comes after the verbs कृष् &c; as, कृषिः, किरिः, &c.

३२८६। संज्ञायाम्। ३। ३। १०९।

अत्र धातो ण्वुल्। उद्दालकपुष्पभञ्जिका।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

3286. The affix 'ṇvul' comes after a verbal root, when the word to be formed is an appellative.

As उद्दालकपुष्पभंजिका 'a sort of game played by the people in the eastern district in which uddâlaka flowers are broken or crushed'. वरणपुष्पप्रचायिका 'a sort of game'; अभ्यूषखादिका; आचोषखादिका; शालभंजिका; तालभंजिका।

३२८७। विभाषाख्यानपरिप्रश्नयोरिञ्च। ३। ३। ११०।

परिप्रश्न आख्याने च गम्य इञ्स्यात्। चात्ण्वुल्। विभाषोक्तेर्यथाप्राप्तमन्येऽपि। कां त्वं कारिं-कारिकां-क्रियां-कृत्यां-कृतिं वाकार्षीः। सर्वां कारिं-कारिकां-क्रियां-कृत्यां-कृतिं-वाकार्षम्। एवं गणिं-गणिकां-गणनाम्। पाचिं-पाचिकां-पचां-पक्तिम्।

3287. And the affix 'iñ' comes optionally after a root, when a question and answer is expressed, (as well as 'ṇvul' and other affixes ordained by other rules).

The word परिप्रश्न means 'question' and आख्यान means 'answer' in the sûtra. In making the compound of these words, the logical sequence is not observed. The compound आख्यानपरिप्रश्न may, however, be justified on the ground that in a Compound a word consisting of smaller number syllables should stand first (II. 2. 34 S. 905,) and hence *âkhyâna* is put first.

The force of च is to draw the anuvṛitti of the word ण्वुल् from the last sûtra into this. By the word 'optionally', it is meant that those affixes which would otherwise present themselves from the sub sequent rules, should also be applied; thus: Q.—कां त्वं कारिमकार्षीः 'What work did you do'? A.—सर्वां कारिमकार्षम् 'I did all work'. Optionally we may have instead of कारि the following also. Q.—कां कारिकां, कृत्यां, कृतिं, क्रियां, अकार्षीः A.—सर्वां कारिकां or कृत्यां or कृतिं or क्रियां अकार्षम्। Similarly, Q.—कां गणिं (गणनां, गणिकां &c.) अजीगणः A.—सर्वां गणिं &c. अजीगणम्. So also कां याजिम् or याजिकाम्; कां याचिम् or याचिकां &c.

Why do we say 'in question and answer? Observe कृतिः and हृतिः।

३२८८। पर्यायार्हर्णोत्पत्तिषु ण्वुच्। ३। ३। १११।

पर्यायः परिपाटीक्रमः। अर्हणमर्हः योग्यता। पर्यायादिषु द्योत्येषु ण्वुच्वा स्यात्। भवत आसिका। शायिका। अग्रगामिका। भवानिक्षुभक्षिकामर्हति। ऋणे। इक्षुभक्षिकां मे धारयति। उत्पत्तौ। इक्षुभक्षिका उदपादि।

3288. The affix 'ṇvuch' comes optionally after a root in the sense of succession, merit, debt or production.

The word पर्याय means turn or order of succession; अर्ह means worthy of respect; ऋण means debt owed to another; and उत्पत्ति means birth or production. This rule supersedes क्तिन् and other affixes. Thus: (1) भवतः शायिका 'your turn of sleeping'; भवतोऽग्रग्रासिका 'your turn of eating first'. (2) अर्हति भवानिक्षुभक्षिकाम् 'you deserve to have a meal of sugar and molasses'. (3) इक्षुभक्षिकां मे धारयसि 'thou owest me a meal of sugar and molasses'; ओदनभोजिकां 'a meal of rice'; पयः पायिकां 'a drink of milk'. (4) इक्षुभक्षिका मे उदपादि।

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

The word 'optionally' is understood in this sûtra also; as चिकीर्षोत्पद्यते।

The forms given by ण्वुल and ण्वुच् are the same, the difference is only in the accent. (VI. 1. 193, S. 3676 and VI. 1. 163 S. 3710).

३२८९। आक्रोशे नञ्यनिः। ३। ३। ११२।

विभाषेति निवृत्तम्। नञ्युपपदेऽनिः स्यादाक्रोशे। अजीवनिस्ते शठ भूयात्। अप्रयाणिः। 'कृत्यल्युटो बहुलम्' (२८४१)। भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तम्। राज्ञा भुज्यन्ते राजभोजनाः शालयः। 'नपुंसके भावे क्तः' (३०९०)।

3289. The affix 'ani' comes after a verb when the particle 'nañ' is in composition with it, and the sense implied is that of cursing.

The anuvṛitti of the word 'optionally' does not extend to this aphorism. The word आक्रोश means to curse. This supersedes the affixes क्तिन् &c. Thus अकरणिस्ते वृषल भूयात् 'may failure be to thee, O sinner'! तस्याकरणिरेवास्तु 'may he be disappointed'. So also अजीवनिस्ते शठ भूयात्। अप्रयाणिः।

Why do we say 'when meaning to curse'? Observe अकृतिस्तस्य कटस्य 'the non-making of his mat'.

Why do we say 'when नञ् is in composition'? Observe मृतिस्ते वृषल भूयात् 'may death be to thee, O! sinner'!

३२८९। क। कृत्यल्युटो बहुलम्॥ ११३॥

वृत्तिः॥ कृत्यसंज्ञकाः प्रत्यया ल्युट् च बहुलमर्थेषु भवन्ति॥

3289A. The affixes called 'kritya' (III. 1. 95) and the affix 'lyuṭ', are diversely applicable and have other senses than those taught before.

The anuvṛitti of the phrases 'when denoting action' and 'when the relation of the word formed to its parent verb is not that of an agent', which began with sûtras III. 3. 18 and 19, does not extend to this sûtra or further. By saying 'diversely' we mean that they occur in other places than those where ordained by the rules. Thus the *kritya* affixes are ordained to come when 'act' or 'object' is to be expressed, but they come also when the *kâraka* is other than the objective. Thus स्नानीयं चूर्णम् 'powder for bathing'; दानीयो ब्राह्मणः 'a Brâhmaṇa' to whom a donation is to be made'. In the first of these examples the 'powder' is the 'instrument' expressible by the 3rd case, and in the second the 'Brâhmaṇa' is the recipient expressible by the fourth case; so that in both cases the affix is applied without any express rule.

Similarly, ल्युट् is ordained to come in denoting instrument, location, and a verbal noun (III. 3. 115 and 117). But it is applied in other senses also. Thus राजभोजनाः शालयः 'halls for the eating of kings'; राजाच्छादनानि वासांसि 'dresses to be worn by the 'king'.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

By using the word 'diversely', even the *kriṭ* affixes are applied in places other than those expressly ordained. Thus पादाभ्याम् ह्रियते = पादहारकः । गले चोप्यते = गलेचोपकः । For accent see VI. 2. 150.

३२८९ । ख । नपुंसके भावे क्तः ॥ ११४ ॥

वृत्तिः ॥ नपुंसकलिङ्गे भावे धातोः क्तः प्रत्ययो भवति ॥

3289B. The affix 'kta' is added to the root, when action is expressed, the word being in the neuter gender.

These are neuter abstract nouns: thus, हसितम् 'laugh'; जल्पितं 'speech'; शयितं 'sleeping'. So also गतं, सहितं &c.

३२९० । ल्युट् च । ३ । ३ । ११५ ।

हसितम् । हसनम् । योगविभाग उत्तरार्थः ।

3290. The affix 'lyuṭ' is added to the root, when the name of an action is expressed, in the neuter gender.

Thus हसनं छात्रस्य 'the laughter of the student'; शोभनं 'beauty'; जल्पनं 'speech'; शयनं 'sleep'; आसनम् 'seat'. So also हसितं ॥

The separation of this sûtra from the last, in which it might well have been included, is for the sake of the subsequent aphorism, in which the anuvṛitti of *lyuṭ* only runs, and not that of क्त ।

३२९१ । कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम् । ३ । ३ । ११६ ।

येन स्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात् । पूर्वेण सिद्धे नित्यसमासार्थं वचनम् । पयः पानं सुखम् । 'कर्तरि' इति किम् । गुरोः स्नापनं सुखम् । नेह गुरुः कर्ता किं तु कर्म ।

3291. The affix 'lyuṭ' is added to a root, when the name of an action is expressed in the neuter gender; provided that the verb has in construction with it, such a word in the accusative case, as indicates the thing, from the contact with which, there arises a pleasant sensation corporally to the agent.

This sûtra is thus translated by Bohtlingk:—"The affix ल्युट् comes in connection with an object, when through the contact with that, the agent of the action feels a lively pleasure". Though the affix *lyut* would have presented itself by the last aphorism, under the circumstances mentioned in this sûtra, the framing of this sûtra, is really for the purpose of teaching, that the compound so formed is a नित्य or invariable compound *i. e.* a compound which cannot be analysed into its component members:—for every उपपद compouud is a नित्य compound, (II. 2. 19). Thus पयः पानंसुखं 'the pleasure of drinking milk'; ओदनभोजनं सुखं 'the pleasure of eating rice'.

Why do we say 'when the word in construction is in the accusative case'? Observe तूलिकाया उत्थानं सुखं 'rising from a bed of down is pleasant'.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Here there is no compounding as the upapada तूलिका is in the ablative case.

Why do we say 'from the contact'? Observe अग्निकुण्डस्योपासनं सुखं 'it is pleasure to sit near by a fire-hearth'. Here there being no contact between 'fire' and 'body', there is no compounding.

Why do we say 'to the agent'? Observe गुरोः स्नापनं सुखं 'to the teacher it is pleasure, when he is made to bathe'. Here the word गुरुः is not the agent, but the object of the verb स्नापयति ।

Why do we say 'corporally'? Observe पुत्रस्य परिष्वञ्जनं सुखम् 'embracing of the son is a pleasure'. Here the pleasure is a mere mental satisfaction and not a physical one.

Why do we asy 'a pleasant sensation'? Observe कंटकानां मर्दनं दुःखम् 'it is painful to rub thorns'. In all the above counter-examples there is no compounding; see II. 2. 19 S. 782 and the connected sûtras.

३२९२ । वा यौ । २ । ४ । ५७ ।

अजेर्वी वा स्याद्यौ । प्रवयणम् । प्राजनम् ।

3292. वी is optionally the substitute of अज् when the affix यु (III, 3. 15 S. 3290.) follows.

This declares an option in the case of the affix ल्युट्, the word यु in the sûtra refers to this affix; as, प्रवयणः or प्राजनो दण्डः 'driving stick or whip'.

३२९३ । करणाधिकरणयोश्च । ३ । ३ । ११७ ।

ल्युट् स्यात् । इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली । खलः प्राक्करणाधिकरणयोरित्यधिकारः

3293. The affix 'lyuṭ' comes after a root, when the relation of the word to be formed to the verb is that of an instrument or location.

Thus इध्मप्रव्रश्चनः 'an axe' (lit. an instrument for cutting wood); पलाशशातनः 'palâsa-cutter'; गोदोहनी 'a milk-pail' (a vessel into which milk is milked); so laso सक्तुधानी । In other words, this affix expresses also the idea of the instrumental case (a tool), and of the locative case (a repository). The anuvṛitti of the words instrument and location extends up to S. 3304 inclusive.

३२९४ । अन्तरदेशे । ८ । ४ । २४ ।

अन्तः शब्दाद्धन्तेर्नस्य णः स्यात् । अन्तर्हणनम् । देशे तु अन्तर्हननो देशः । अत्पूर्वस्येत्येव । अन्तर्घ्नन्ति । 'तपरः' किम् । अन्तरघानि ।

3294. The न preceded by short अ of the root हन् is changed into ण, when the root follows the upasarga अन्तर्, and the word does not mean a country.

Thus अन्तर्हण्यते and अन्तर्हणनं ॥

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Why do we say " when not meaning a country अदेशे ?" Observe अन्तर्हननो देशः ॥

The phrase अत्पूर्वस्य "preceded by short अ" of sûtra VIII. 4. 22 S. 359 is to be read into this sûtra also. Observe, अन्तर्घ्नन्ति ॥

Why do we say " *short* अ ? " See अन्तरघाणि ॥ The word antar is an upasarga for the purposes of ण change, by the vârtika under I. 4. 65 ; S. 766 therefore, it would have caused the ण change by VIII. 4. 22. The present sûtra is made, to show that the change takes place only then, when it does not mean a country.

३२९५ । अयनं च । ८ । ४ । २५ ।

अयनस्य णोऽन्तः शब्दात्परस्य । अन्तरयणम् । अदेश इत्येव । अन्तरयनो देशः ।

3295. The न of अयन is changed to ण, when preceded by the word अन्तर्, and the word does not denote a country.

Thus अन्तरयणं शोभनम् ॥ Why do we say " not denoting a country"? Observe अन्तरयनो देशः ॥ This ण change would have taken place by VIII. 4. 29, this special sûtra is for अदेश purposes. The word अयन is formed by ल्युट् added to अय् or इण् ॥

३२९६ । पुंसि संज्ञायां घः प्रायेण । ३ । ३ । ११८ ।

3296. The affix 'gha' generally comes in the sense of an instrument or location, after a root, when the word to be formed is a name and is in the masculine gender.

The force of the word प्रायेण ' generally' is to show that this rule is not a universal rule. Thus दन्तच्छदः ' the lip'. छादि ' to cover' + घ (VI. 4. 96 S. 3297. See below) = छदः lit. ' that by which the teeth are covered' ; so also उरश्छदं ' a breast plate '; पटः । These denote instruments.

So also in denoting ' location'. Thus आ + कृ + घ = आकरः ' a mine', so named because men work (*âkurvanti*) in it, आलयः ' house' that in which men settle down.

Why do we say ' in the masculine gender' ? Observe प्रसाधनम् ' a comb' ; (lit. that by which men decorate). Here the affix is *lyut*.

Why do we say ' when the complete word so formed is merely an appellative ? Observe प्रहरणो दण्डः ' the beating stick'.

The indicatory घ् is merely qualifying for the application of sûtra VI. 4. 96, S. 3297 by which after the causative छादि, when घ is added, the long आ is shortened.

३२९७ । छादेर्घेऽद्व्युपसर्गस्य । ६ । ४ । ९६ ।

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे । दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः । आकुर्वन्त्यस्मिन्नाकरः ।

3297. The penultimate of the Churâdi छद् is shortened

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

before the affix घ (III. 3. 118), when not preceded by two prepositions (or more).

As उरश्छदः, प्रच्छदः, दन्तच्छदः ॥ But समुपच्छादः with two prepositions. The same when preceded by more than two prepositions, as समुपातिच्छादः ॥ The elision of णि of छादि &c., by VI. 4. 51 S. 2313 should not be considered as asiddha (VI. 4. 22 S. 2183) or sthânivat (I. 1. 57 S. 50), otherwise there would be no *penultimate* to be shortened.

३२९८ । गोचरसंचरवहव्रजव्यजापणनिगमाश्च । ३ । ३ । ११९ ।

घान्ता निपात्यन्ते । 'हलश्च' (३३००) इति वक्ष्यमाणस्य घञोऽपवादः । गावश्चरन्त्यस्मिन्निति गोचरो देशः । संचरन्तेऽनेन संचरो मार्गः । वहन्त्यनेन वहः स्कन्धः । व्रजः । व्यजस्तालवृन्तम् । निपातनाद्वीभावो न । आपणः पण्यस्थानम् । निगच्छन्त्यनेन निगमश्छन्दः । चात्कषः । निकषः ।

3298. And the words 'gochara', 'sañchara', 'vaha' 'vraja', 'vyaja', 'âpaṇa' and 'nigama' are anomalous.

These words are irregularly formed by the affix घ with the same force as in the last aphorism. This is an *apavâda* or exception to rule III. 3. 121, S. 3300 by which after roots ending in consonants, the affix घञ् is added. Thus गोचरः 'pasturage', (lit. that in which the cows graze); संचरः 'a passage', (lit. through which they move); वहः 'a vehicle' (lit. by which men are carried); व्रजः 'a cow-pen, (by which they go); व्यजः 'a fan' (by which they move the air); the anomaly in this consists in not replacing the अज् of व्यज् (वि+अज्) by the substitute वी as required by sûtra II. 4. 56 S. 2292; आपण 'a market' (lit. that in which men come and *traffic*); निगमः 'the Veda', 'a market' (that into which they *enter*)

The force of the word च in this aphorism is to include other words also, which have not been already mentioned. Thus कषः, निकषः 'a touch-stone' (lit. that on which they rub).

३२९९ । अवे तॄस्त्रोर्घञ् । ३ । ३ । १२० ।

अवतारः कूपादेः । अवस्तारो जवनिका ।

3299. The affix 'ghañ' comes after the roots 'trî' (to cross) and 'strî' (to spread), when the upasarga 'ava' is in composition with them, and when the word so formed is an appelative related to the verb either as an instrument or as a location.

This supersedes घ. The ञ् is indicatory and causes the vriddhi of ऋ (VII 2. 115 S. 254) and is also for the sake of regulating the accent (VI. 1. 195, 197 S. 3678,3686). The indicatory घ् is useful in the subsequent aphorism where it changes the palatals into gutturals. Thus अवतारः "the descent" into the well &c. अवस्तारः 'a screen round a tent'.

How do we apply अवतार also in phrases like अवतारो नद्याः 'the descent of rivers', for here the word *avatâra* is not an appellative? This use is

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

also allowed, because the anuvṛitti of the word प्राय is understood here also; so that these words *avatâra* &c. may be employed in senses other than appellative.

३३०० । हलश्च । ३ । ३ । १२१ ।

हलन्ताद्घञ्स्यात् । घापवादः । रमन्ते योगिनोऽस्मिन्निति रामः । अपमृज्यतेऽनेन व्याध्यादि-रित्यपामार्गः । विमार्गः समूहनी ।

3300. And after a verb ending in a consonant, comes the affix 'ghañ', (when the word to be formed is masculine, and related to the verb as an instrument or a location, and thereby the palatal is changed into a guttural).

The whole of the phrase within brackets is to be read into this sûtra from III. 3. 118 S. 3296. This excludes घ. Thus लेखः 'a writing' (that in which something is inscribed); वेदः 'the Veda' (that by which all is known); वेषः 'dress' (that which is *entered into*); बन्धः 'obstruction'; मार्गः 'a way' (that on which they seek); अपामार्गः 'a plant' (that by which disease or the like is cleared away); रामः 'Râma' (*i. e.* in which the devout delight); विमार्गः

३३०१ । अध्यायन्यायोद्यावसंहाराश्च । ३ । ३ । १२२ ।

अधीयतेऽस्मिन्नध्यायः । नियन्त्युद्युवन्ति संहरन्त्यनेनेति विग्रहः । '* अवहाराधारावाया-मानुपसंख्यानम् *' ।

3301. And the words 'adhyâya', 'nyâya', 'udyâva', and 'saṁhâra', are anomalous.

These words are formed by adding the affix घञ् to the exclusion of घ which would have come by III. 3. 118 S. 3296. All these words are derived from roots which end in vowels. Thus अधि+इ+घञ्=अध्यायः 'a chapter or book' (lit. that in which they read); नी—न्यायः 'logic, justice', (lit. नियन्ति अनेन that by which men are *led*); उत्-यु—उद्यावः 'mixture' (lit. उद्युवन्ति अनेन that in which they *blend*); सम्-हृ—संहारः 'destruction' (lit. संहरन्ति अनेन by which they are destroyed). *Vart*:—avahâra, âdhâra and âvâya should be enumerated. आ-धृ—आधारः 'support' (lit. in which anything is held); आ-वि—आवायः=आवयन्ति अस्मिन् । So also अवहारः ।

३३०२ । उदङ्कोऽनुदके । ३ । ३ । १२३ ।

उत्पूर्वादञ्चतेर्घञ्स्यात् न तूदके । घृतमुदच्यते उद्ध्रियतेऽस्मिन्निति घृतोदङ्कश्चर्ममयं भाण्डम् । 'अनुदके' किम् । उदकोदञ्चनः ।

3302. The word 'udaṅka' is anomalous, when the sense of the root refers to subjects other than 'water'.

The word is thus formed: उत्+अंच+घञ्=उदङ्कः 'a vessel'.

Would not the affix घञ् have come by sûtra III. 3. 121, S 3300 why then this aphorism? This is made a seperate aphorism in order to prohibit the application of the affix, where the word to be formed means 'water'.

CC-O. Prof. Satya Vrat Shastri Collection. Digitized By Siddhanta eGangotri Gyaan Kosha

Thus तैलोदङ्कः 'a leathern vessel for oil'. So also घृतोदङ्कः।

Why do we say 'when not referring to 'water'? Observe उदकोदंचनः 'a bucket for drawing water' (उ+अञ्चु+ल्युट्).

३३०३ । जालमानायः । ३ । ३ । १२४ ।

आनीयन्ते मत्स्यादयोऽनेनेत्यानायः । 'जालम्' इति किम् । आनयः ।

3303. The word 'ânâya' is irregularly formed when meaning 'a net'.

The word is thus formed in the sense of instrument. आ+नी+घञ्=आनायः 'a net (by which they are caught); as आनायो मत्स्यानां 'a net for fish'; आनायो मृगाणाम् 'a net for wild deer &c'. Why do we say 'net'? Observe आनयः॥

३३०४ । खनो घ च । १ । ३ । १२५ ।

चाद्घञ् । आखनः-आखानः । घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम् । तेन भगः पदमित्यादि । '*खनेर्डडरेकेकवका वाच्याः*' । आखः-आखरः-आखनिकः-आखनिकवकः । एते खनित्रवचनाः ।

3304. The affix 'gha' as well as 'ghañ' comes after the verb 'khan' (to dig), (when the word to be formed is an appellative related to the verb as instrument or location).

The affix घञ् has been read into the sûtra by force of the word च ।

